## संहितायाम् । (११४/१०३५)

संहितायाम् इत्ययमधिकारः[1] । यद् इत उर्ध्वमनुक्रमिष्यामः संहितायाम् इत्येवं तद् वेदितव्यम् । वक्ष्यति – 'द्व्यचोऽतस्तिङः' (६.३.१३५/३५३७) इति । 'विद्मा हि त्वा [2]गोपतिं शूर गोनाम्' (ऋ. १०.४६.१) । संहितायाम् इति किम् ? विद्म, हि, त्वा, गोपतिं, शूर, गोनाम् ॥

## कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । (११५/१०३६)

कर्णशब्दे उत्तरपदे लक्षणवाचिनो दीर्घो भवति विष्ट अष्टन् पञ्चन् मणि भिन्न छिन्न छिद्र स्रुव स्वस्तिक इत्येतान् वर्जयित्वा । [3]दात्राकर्णः । द्विगुणाकर्णः । [4]त्रिगुणाकर्णः । द्व्यङ्गुलाकर्णः । [5]अङ्गुलाकर्णः । यत् पशूनां स्वामिविशेषसम्बन्ध[6]ज्ञापनार्थं [7]दात्राकारादि क्रियते तदिह लक्षणं गृह्यते । लक्षणस्य इति किम् ? शोभनकर्णः । अविष्टादीनाम् इति किम् ? विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । [8]मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ॥

## नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । (११६/१०३७)

नहि वृति वृषि व्यधि रुचि सहि तनि इत्येतेषु क्विप्रत्ययान्तेषु उत्तरपदेषु पूर्वपदस्य दीर्घो भवति संहितायां विषये । नहि – उपानत् । परीणत् । वृति – नीवृत् । उपावृत् । वृषि – प्रावृट् । उपावृट् । व्यधि – मर्मावित् । हृदयावित् । श्वावित् । रुचि – नीरुक् । [9]अभीरुक् । सहि – [10]ऋतीषट् । तनि – [11]तरीतत् । 'गमः क्वौ' (६.४.४०/२९८६) इति गमादीनामिष्यते । ततः तनोतेरप्यनुनासिकलोपः । क्वौ इति किम् ? [12]परिणहनम् ॥

## वनगिर्योः सञ्ज्ञायां कोटर[13]किंशुलुकादीनाम् । (११७/१०३८)

वन गिरि इत्येतयोरुत्तरपदयोर्यथासङ्ख्यं कोटरादीनाम् [14]किंशुलुकादीनां च दीर्घो भवति सञ्ज्ञायां विषये । वने कोटरादीनाम् – [15]कोटरावणम् । मिश्रकावणम् । सिध्रकावणम् । [16]सारिकावणम् । गिरौ [17]किंशुलुकादीनाम् – किंशुलुकागिरिः । [18]अञ्जनागिरिः । कोटर[19]किंशुलुकादीनाम् इति किम् ? असिपत्रवनम् । [20]कृष्णगिरिः ।

कोटर । मिश्रक । [21]पुरक । सिध्रक । सारिक । कोटरादिः ।

[22]किंशुलुक । [23]शाल्वक । अञ्जन । [24]भञ्जन । लोहित । कुक्कुट । किंशुलुकादिः ॥

## वले । (११८/१०४०)

वले परतः [25]पूर्वस्य दीर्घः भवति । आसुतीवलः । कृषीवलः । दन्तावलः । 'रजःकृष्यासुतिपर्षदो वलच्' (५.२.११२/१९१९) इति वलच् प्रत्ययो गृह्यते, न प्रातिपदिकम् । [26]अनुत्साहभ्रातृपितॄणामित्येव । उत्साहवलः । भ्रातृवलः । पितृवलः ॥

1. वेदितव्यः इत्यधिकम् फ. ह. 2. सत्पतिं मुद्रितः पाठः 3. दत्ताकर्णः ह. 4. नास्ति फ. 5. नास्ति ह. 6. °परिज्ञानार्थम् फ. 7. दात्राकारादिकं फ. 8. नास्ति ड. 9. नास्ति फ. 10. अतीषट् ड, ऋतीषाट् ह. 11. परीतत् ड. फ. क. 12. परिणाहनम् ब. 13–14. किंशुलकादीनाम् क. 15. पुरकावणम् फ. 16. शारिकावणम् फ. 17. किंशुलकादीनाम् क. 18. भञ्जनागिरिः फ. ह. 19. किंशुलुकानड ब, नभ्र ड. किंशुकादीनाम् ह. 20. उष्णगिरिः ह. 21. पुरग ड. 22. किंशुक फ. 23. शालुक फ, 24. भाजन ड. 25. पूर्वस्य नास्ति फ. क. 26. अनुत्साह – पितृवलः नास्ति ब. ह.